ऊँ० ४८९६

नाम - सौभाग्यकल्पद्रुमः

कर्ता - x

पत्र संख्या - ४५ पत्राणि सं० x

विषय - तन्त्रम्

सौभाग्यकल्पद्रुमः

[illegible]

[illegible] पधी

पुस्तकमेतद् रामचन्द्रपाण्ड्यस्य

नं० ९०८८६

सौभाग्यकल्पद्रुमः, वस्ता २

१००

सौ॰ भा॰ कु॰ श्रीगणेशाय नमः ।। यत्रेदमखिलं भाति कार्यं बीजांकुरोपमं । विमृशामि परां हंतां स्वात्ममूर्त्ति

१ मनुत्तरां १ नत्वा श्रीपादवानंदपादपद्मं हृदि स्थितं उद्भावयामि सौभाग्यकल्पद्रुममभीष्टदं २

प्रातः स्मृतिस्नानसंध्याजपन्यासादिभिः सदा उपास्यायाः साधकेंद्रैस्तामंबां हृदि भावये ३ अ

थ श्रीसाधकेंद्र उषसि ह्युत्थितः स्वात्मदेवतां संचिंतयन्स्थिरपद्मासनासन एकाग्रचित्तः स्वमूर्ध्न्य

धोमुखविकसितसहस्रदलकमलकर्णिकास्थितपूर्णचंद्रनिभं श्रीनाथं ध्यात्वा मूलाधारे ऊर्ध्व त्रि॰ वः

मुखरक्तसहस्रदलकमलकर्णिकामध्यस्थितकुलकुंडांतः सुप्तसर्पाभां सार्धत्रिवलयाकारां १

बिसतंतुसूक्ष्मां तडित्कोटिप्रभां कुंडलिनीं ध्यात्वा कुंभकश्वासमनुद्बुद्धां सुषुम्णामार्गेण ब्रह्मरं

भस्थित चंद्र मंडलं प्रविष्टां तेन प्रासैकरस्यां भावयन् ततश्चंद्र मंडल गलद् मृत धाराभिराप्लुत मा

त्मानं ध्यायन् संघट्ट मुद्राभ्यामपूर्वकं पादुकामनुचिंत्य। लं पृथिव्यात्मने गंधं समर्पयामि हं आका

शात्मः पुष्पं स० २ यं वाय्वात्म० धूपं स० ३ रं तेज आत्म० दीपं० ४ वं अमृतात्म० नैवेद्यं० ५ इति मानसैः पं

चोपचारैः संपूज्य। पंचमुद्रा प्रदर्शन पूर्वकं ब्रह्मरंध्रेत्यादि स्तुत्वा। ततश्चंद्र मंडल निर्गतामाद्यां शक्तिमा

नाहत कमले ध्यानोक्त रूपां ध्यात्वा यथाशक्ति मानसोपचारैः समर्च्य। विद्यां मनसा जपन् मूलाधारे

पूर्ववत् ध्यात्वा। पंचोपचारैः संपूज्य। गुरुं देवतां च स्तुतिभिः स्तुत्वा आवश्यकं निवर्तयेत् अथ तीर्थादौ

यथोचितमवगाह्य। रीं आत्मतत्त्वाय स्वाहा १ क्लीं विद्यातत्त्वाय स्वात्मतत्त्वाय स्वाहा २ रं सोः शिवत०

हा ३ सर्वतन्हा ४ ओष्ठौपरिमृज्य। हस्तौ प्रक्षालयेत् इत्याचम्य। एतद्द्वयं सर्वत्र कर्मादौ ज्ञेयं। अनामा
कनिष्ठाङ्गुष्ठैः वामनासापाश्वा समापूर्य। मू: त्रिर्मनसा जपेन् रयाविसृजेदिति प्राणानायम्य। देशकाला
वस्थां गस्थितिं चोल्लिख्य। पादेवतप्रीत्यर्थं स्नानमहं करिष्ये इति संकल्प्य त्रिरवगाह्य। जले पुरतः स्वा।
भिमुखाग्रे त्रिकोणं अग्रादि वामतः वाक्तावीजं मध्ये मायामेवं अनामया कृत्वा मध्ये देवतां ध्या
त्वा लं पृथिव्यात्माय भ्यर्च्य: ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन मे देव तीर्थं देहि दि
वाकर ओं इति सूर्यमंडलात् अंकुशमुद्रया तीर्थमाकृष्य तत्रावाहयेदमिति धेनुमुद्रयामृती कृत्य अं
गुष्ठानामायोगेन मू: मूर्ध्नि सप्तधा प्रोक्ष्य मू: कुंभमुद्रया मस्तके हृद्भुजेषु त्रिस्त्रिरभिषिंच्यानन्त

जलेमग्नः मूलंजपन्देवतांतीर्थमयींध्यात्वोत्थायत्रिर्निमज्य आचम्यवाससीपरिधायासने
उपासीनः आचम्यवामकरे भस्मदक्षेण न्यस्य सद्योजातंप्रपद्यामिसद्योजातायवैनमः। भवेभ
वेनातिभवे भवस्वमां भवोद्भवायनमः वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः
कालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्व
भूतदमनायमनोन्मनायनमः। अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्योन
मस्ते अस्तु रुद्ररूपेभ्यः तत्पुरुषायविद्महे महादेवायधीमहितन्नोरुद्रः प्रचोदयात्। ईशानः सर्व
विद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिवोमे अस्तु सदाशिवों। कामे

सो॰ प॰ द्धु॰

३

श्वरं मंत्रं च पठित्वा। एवमभिमंत्र्य मस्तकमालहृत्कर पादयोः सर्वांगे षुइशादि पंचमंत्रैः प्रणवेन चोद्धू

लनं कृत्वा त्रिःपुंड्रं मस्तकादिषु कुर्यात् ततआचम्य प्राणानायम्य पूर्ववत्प्रातः संध्यामुपासिष्येइति

संकल्प्य मूलरुद्र्यादिध्यानांतं कृत्वा त्वौयं दक्षहस्तस्थितमिनरेणाच्छादितं हुं रें ह्रीं श्रीं इति नारचतु

ष्टयेन लंवं रं यं हं इति भूतबीजपंचकेन मृ सप्तवारत्या अमृतमालिनी स्वाहेत्यमृतमालिनीविद्या

३

सप्तवारत्या चाभिमंत्रितमितरकरगृहीतं तनदंगुलिसंधिनिसृतेन दक्षांगुष्ठनामायोगेन मूर्ध्नि हृदि च

शिवः

मूलेन सप्तधाभ्युक्ष्य शेषतोयं तेजोरूपं विमृश्य कुलामृतेन संयोज्य दक्षनासयांतःप्रविष्टमंत

३

सकलकलुषक्षालनपूर्वकं इतरनासया लेनिर्गतं विभाव्य दक्षकरे गृहीत्वा स्ववामे वकाग्नि

नवज्वरित्रिसाधां ऐं ग्लौं पध्युहुं हृडिति पाशुपतास्त्रेण स्फाल्य सम्माजिन हस्त आचम्य ४ ऐं वागी
श्वरी विद्महे क्लीं कामेश्वरी धीमहि । सौः तन्नः शक्तिः प्रचोदयात् त्रिपुरसुंदरी पादुकायै एषो
र्घ्यः स्वाहेति त्रिरर्घ्यं दत्त्वा ४ मू॰ त्रिपु॰ दरी पादुकां तर्पयामि इति त्रिःसंतर्प्य ४ ह्रां ह्रीं हंसः प्रका
शशक्ति सहित मार्तंड भैरवाय एषो॰ हेति त्रिरर्घ्यं ४ ह्रां ३ प्रका॰ भैरव पादुकां तर्पयामि नमः
इति त्रिः संतर्प्य मूलाधारे ऐं जं नवरवि कोटि समाभासं ध्यात्वा तत्ते जआवाहन क्रमेण वह्नि
एकारे ऽग्निमंडले आवाह्य तद्द्रुतां वागीश्वरीं ध्यायेत् यथा पीतां पीतांबरालेपस्र
ग्विभूषानुभूषितां नवरवि कोटिसमाभासां चाऽनामक्षसगुज्ज्वलां १ पुस्तकाप्रकरां भो

सौ· ग्य· दु·
४

५

जांवह्रींह्रीं पीठे तिषेदुषीं वाग्भवींवाग्भवोद्भूतांत्रीसलां सुस्मितां स्मरेत् २ इति ध्यात्वा मान
सैः संपूज्य ४ ऐं त्रिपुरा देवी विद्महे वागीश्वरी धीमहि तन्नो सुक्लिः प्रचोदयात् वागीश्वरी पादु-
हेति त्रिरर्घ्यं दत्वा ऐं वागीश्व० यामि इति त्रिः संतर्प्य आचम्य तो पात् देवतासु ह्यस्या। कर्न्यादिष्
जांतं कृत्वा मूल गायत्रीं मूलं वाग्भव गायत्रीं वाग्भवबीजं च प्रत्येकं दशधा प्रजप्य। गौरीमिमाय
सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परं
मे व्योमन्। इत्युपस्थाय आचम्य· अनया प्रातः संध्यया परदेवता प्रियतां इति समर्पयेत् आ
पदिन्यासांतं कृत्वा मू· लदेव्यर्घ्येन पर्लं च कृत्वा मूलगायत्रीं दशधा जपेत् इति आग्नेचेय्येनाव

त्रि· व:
४

देवकिंतु मंत्रोच्चारो मानसः इति प्रातःसंध्यामुपास्य ततः दिननाथविद्यां घटिकाविद्यां च त्रिसः ज
पेत्. यथा मूलस्य षडक्षर्यादि पूजां तं कृत्वा ४ मू. अं० कं हं प्रकाशात्मकोन्मन्याशानंदनाथश्रीपादुकां
पूजयामि नमः १।४ मू. लं. अः संविमर्शात्मकसमनाकाशानंद० नमः २।४ मू. कं. हं. सं आनंदात्म
कव्यापकाकाश० नमः ३।४ मू. चं. जं मंत्रानात्मकशक्त्याकाश० नमः ४।४ मू. टं. णं. लं सत्यात्मकध्वन्या
काश० नमः ५।४ मू. तं. नं. वं स्पर्शात्मकध्वनिमात्राकाश० नमः ६।४ मू. पं. मं. रं स्वभावात्मकानाहताकाश०
नमः ७।४ मू. यं. शं. यं प्रतिभात्मकबिंद्वाकाश० नमः ८।४ मू. षं. क्षं सुभगात्मकबिंद्वाकाश० नमः इति ९
अथ घटिकाविद्याः ४ मू. अं सं अं हं अकारादिहकारांता घटिकाशक्ति श्रीपादुकां पूजयामि

सो॰ न्य॰ द्धु॰
५

5

न्यः १।४ मू॰ तं क्षं अं॰ डुं॰ एकारादि ङ॰ कारांता॰ मः २।४ मू॰ वं॰ क्षं॰ अं॰ णं चकारादि णकारांता॰ मः ३।४
मू॰ तं क्षं अं॰ मेन कारादि मकारांता॰ मः ४।४ मू॰ यं॰ क्षं यं॰ क्षं यकारादि क्षकारांता॰ मः ।५।४ इति न
न्यासैर्दिनविद्यां ज्ञात्वा त्रिधा जपः कर्त्तव्यः । नवभिः पंचभिश्च दिनैरनयोः समाप्तिः द्वशमे षष्ठे वारंभः
एवं नवन्यासविद्याजपोनरं घटिकाविद्याजपोनरं चक्रेमे पानवचारं षष्टिवारं मूलमावर्त्तयेत्
न्यासघटिकापारायणा करलेद्दं कर्त्तव्यं इति नवपारायणस्कंधेन निरूप्यते अथ मध्याह्नसंध्या
। आचमनादि मार्तंडभैरवतर्पणांतं सामानं संकल्पेत् प्रातःपदस्थले मध्याह्नपदं देयं अनंतरं ना
हनेक्लीं बीजं रक्तवर्णं ध्यात्वा पूर्ववत् शकाशे सूर्यमंडले आवाहनं दुत्तां कामेश्वरीं ध्याये

त्रि॰ व॰
५

त्।यधारक्लीं सुरक्लीं वरभूषणाढ्यांपाशांकुशाभीतिवरान्दधानांशुचिस्मितांसुन्दरयौवनां।
नाढ्यांकामेश्वरींसंस्मरतत्रिनेत्रां १ इति ध्यात्वा मानसैः संपूज्य ४ क्लीं त्रिपुरादेवी विद्महे
कामेश्वरी धीमहितन्नः क्लिन्ना प्रचोदयात् कामेश्वरी पातु· हेति त्रिरर्घं दत्त्वा क्लीं कामेश्व·
रामीति त्रिस्संतर्प्य आचमनाद्यवशिष्टं समानं। वाग्भवाद्यायत्रीबीजजपस्थले कामगा
यत्रीबीजजपो विशेषः संध्यांपूर्ववत्समर्प्ययेत् इति मध्याह्नसंध्यामुपास्य ततस्तत
त्त्वविद्यां प्रजपेत् यथा मू· क्रः ष्यादि सृजातं ४ मू· अं शिवतत्त्वानंदनाथरूपिणीकामेश्वरीपा
दुकां पूजयामि नमः १।४ मू· कं शक्तितत्त्व· वज्रेश्वरी· मः २।४ मू· खं सदाशिवत· भगमालिनी· मः

सौ·ग्य·हृ
६

श्रीमूः गंईश्वरात· शुद्धविद्यां· मः ४।४ मूः· घंशुद्धविद्यान· वामाविद्याम: ५।४ मूः· ङं मायात· क्षुद्र
शाद्धूर्वा· मः ६।४ मूः· चंकलात· राजश्यामलांवाम्बः ७।४ मूः· छंविद्यात· शुकश्यामलांवा· मः
८।४ मूः· जंरागात· शारिकाश्यामलांवा· मः ९।४ मूः· झंकालत· संगीतश्या· मः १०।४ मूः· ञंनिय
तित· साहित्याश्या· मः ११।४ मूः· टंपुरुषत· हंसताश्या· मः १२।४ मूः· ठंप्रकृतित· लघुश्या· मः १३।४
मूः· डं अहंकारात· सौभाग्यविद्या· मः १४।४ मूः· ढंबुद्धितत्वा· ब्रह्मास्त्र· मः १५।४ मूः· णंमनस्त· वारा
ही· मः १६।४ मूः· तंश्रोत्रत· वटुकभैरवी· मः १७।४ मूः· थंत्वक्त· तिरस्करिणी· मः १८।४ मूः· दंचक्षुर
न· लोपामुद्रा· मः १९।४ मूः· धंजिह्वात· भुवनेश्वरी· मः २०।४ मूः· नंघ्राणात· अन्नपूर्णा· मः २१।४

6

त्रिव:
६

मू. पंवाक्त. कामकला. मः २२।४ मू. फंपाणिन. तुरीया. मः २३।४ मू. वंपादन. महार्घा. मः २४।४ मू.
भंपायुन. अश्वारूढा. मः २५।४ मू. मंउपस्थन. मित्रांबा. मः २६।४ मू. यंशब्दन. वाग्वादिनी. मः
२७।४ मू. रंस्पर्शन. प्रासादपरा. मः २८।४ मू. वंरसन. परा. मः ३०।४ मू. शंगंधन. पशांभवी. मः ३१।४ मू. षं
गगनन. ऊर्ध्वाम्नायसमयविद्या. मः ३२।४ मू. संवायुन. उत्तराम्ना. विद्या. मः ३३।४ मू. हंतेजन. पश्चिमा
म्ना. द्या. मः ३४।४ मू. कुंअप्तः दक्षिणाम्नाः द्या. मः ३५।४ मू. क्षंपृथिवीन. पूर्वाम्ना. द्या. मः ३६ एवंततद्दि
नतत्त्वविद्यांविधायजप्त्वामूलंषड्विंशद्वारमावर्तयेत् अत्रकामेश्वर्यादिनामारौततन्मंत्रपाठोमु
ख्यः। अत्राप्येतस्यकर्तव्यत्वेनतत्त्वपारायणाकरणेइतिज्ञेयं अथसायंसंध्यानत्रापिसंकल्पेसायंपदो

सौ·ग्य·द्रु·
७

7

हः भैरवान्तर्पणान्तं विधाय आज्ञाचक्रे सौः बीजं शुक्लवर्णं विभाव्य पूर्ववदाकाशे चंद्रमंडले आवा
हनदुक्त्तामम्रतेश्वरीं ध्यायेत्। शुक्लांशुक्लांबरालेपस्रग्विभूषानुभूषितां। वराभयधरां नेत्रत्रयो
ल्लासिमुखांबुजां।२। शरत्पत्स्फुरितद्वंद्वा च भैरवीरूपमास्थितां। जरापलितसंकीर्णां लंबपीनपयोधरां
।रक्तांकुशौ पुस्तकं च स्फटिकाक्षस्रजं करैः। दधानां शक्तिबीजोत्थां पुलें रोमंडले स्थितां।३। ध्यायेत्त्व
द्योपरां शक्तिं प्लाक्तिमद्भिर्निषेवितां। भोगमोक्षप्रदां शांतां ममनंतायं मृतेश्वरीं।४। पंचपूजां कृत्वा
४सौः त्रिपुरादेवी विद्महे शक्तीश्वरी धीमहि। तन्नोमृता प्रचोदयात् अमृतेश्वरी पादुः स्वाहेति त्रि
रर्घ्यं दत्वा। सौः अमृतेश्व-यामीति त्रिः संतर्प्य वाग्भवगायत्रीबीजस्थाने शक्तिगायत्री शक्तिबीजं चप

त्रि·व:
७

न्यवशिष्टं पूर्ववत्समापयेत् एवं संध्यां समर्प्य नन्दिने नित्यां प्रजपेत् मू॰ न्यादिन्यासं कृत्वा ।४
मू॰ ॐ ऐं २ ॐ नमः कामेश्वरि इच्छाकामफलप्रदे सर्वसत्ववशं करि सर्वजगत्क्षोभणकरि हुं ३ द्रां द्रीं
क्लीं ब्लूं सः सौः क्लीं ऐं ।४६। कामेश्वरीनित्याश्री पादुकां पूजयामि नमः ।१४ मू॰ ॐ । ऐं भगभुगे भगिनि
भगोदरि भगांगे भगमाले भगावहे भ॰ गुह्ये भ॰ योनि भ॰ निपातिनि सर्वभ॰ सर्वशंकरि भ॰ रूपे नि
त्यक्लिन्ने भः स्वरूपे सर्वभगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय सर्वस
त्वान् भगेश्वरि अमोघे भ॰ विच्चे क्षुभ क्षोभय सर्वसत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें क्लिन्ने सर्वाणि
भगानि मे वशमानय स्त्रीं हें ब्लूं ह्रीं ।१४५ भगमालिनीनि॰ मः ।२।४ मू॰ ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वा

सो॰ग्र॰दु॰ ८

8

हा ।११ नित्यक्लिन्नानि॰मः ।३।४।मू॰ ईं ऊँ क्रों भ्रों क्रों झ्रौं छ्रौं ज्रौं म्लौं स्वाहा १० भेरुंडानि॰मः ४।४ मू॰ ऊं ।ह्रीं वासि
न्यै नमः ८ वह्निवासिनीनि॰मः ५।४।मू॰ ऊं।ॐ ह्रीं क्लें स्त्रः नित्यक्लिन्ने मदद्रवे स्वाहा ।१४ महाविद्येश्वरीनि॰
मः ६।४ मू॰ क्रैं ह्रूं शिवदूत्यै नमः ७ शिवदूतीनि॰मः ७।४ मू॰ क्रैं।ॐ ह्रीं हुं खेचछे क्षः स्त्रीं हूं क्षें ह्रीं फट्
।१२ त्वरितानि॰मः ८।४ मू॰ ह्रूं ऐं २।३ कुलसुन्दरीनि॰मः ९।४ मू॰ ह्रूं ऐं २ ह्स्क्लैं ह्क्लीं स्ह्लौं ः द्रोः द्रां॰ ४ सौः
क्लीं ऐं ।१४ नित्यानि॰मः १० ४ मू॰ ऐं ॐ ह्रीं क्लें ब्लें ओं ह्रीं क्रों नित्यमदद्रवे हुं क्रों ।१५ नीलपताकानि॰मः
११।४ मू॰ ऐं भ्म्र्यौं १ विजयानि॰मः १२।४ मू॰ ओं सों सर्वमंगलायै नमः ।९ सर्वमंगलानि मः ।१३।४ मू॰
ओ ओं नमो भगवति ज्वालामालिनि देवि देवि सर्वभूतसंहारकारिके जातवेदसि ज्वलंति ज्वल र

नि॰ व॰ ८

हुं ह्रुं रं रं हुं फट् स्वाहा ५३ ज्वालामालिनीनि॰मः १४।४ मू॰ अं कौं चित्रायै नमः ६ चित्रानि॰मः १५।४ मू॰
अः मू॰ महात्रिपुरसुंदरीनि॰मः १६।४ मू॰ अः। ह १२ महासप्तदशी नित्याः मः १७। अत्रांत्योपांत्ययोरनंत
द्दिननित्याजपानंतरं प्रत्यहं जपस्थितिशक्तित्वात्संप्रदाये। षोडशनित्यासंप्रदाये तु चरमस्यैवेति ध्येयं। एत
च्च नित्यापारायणाकरणे ज्ञेयं। अत्रेदमवधेयं। संध्यायां मूलदेव्यर्पितपर्णजपानामंगित्वं अ
शिष्टस्यांगत्वं विस्मरणे नांगलोपे पुनःकरणं नास्ति। अपि तु तस्याप्यच्छितं दशधा मूलजपः अंगिलो
पे तु द्वितीयसंध्याकालादर्वाक् स्मरणे पुनःसंध्याकरणं। अनंतरं स्मरणे अष्टोत्तरशतं मूलजपः।
संपूर्णसंध्यालोपे प्येवं। तत्र च मुख्यकालात्यये मध्यकालात्यये गौणकालात्यये चक्रमान्मूलजपाय

सो॰ प॰ द्व॰
९

त्रीद्दशकं नत्वा त्वगायत्रीशतकं मूलशतकंच जपेत्। सन्नक्षत्रः समस्सूर्यः अर्धस्सूर्यश्च मुख्यः का
लः प्रातर्मध्याह्न संध्या कालो मध्यः हिनी यका लांतो गौणः। पुनः संध्यायां प्राङ्मुखः इतरयोरुद
ङ्मुखः। अर्घ्यप्रदानजपयोः सूर्याभिमुख इति। एवं कृतसंध्यादिक्रियः जपस्थानादौ पुरश्चरणसं
धेवक्ष्यमाणासनान्यतमेऽन्यतमेनासनेन प्राङ्मुख उदङ्मुखो वा आसीनः भूशुध्यादिकं कुर्या

१

त् यथा अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु [illegible] वाज्ञया इति   शिवः
भूतानुत्सार्य। भूमि त्वया धृता लोका देवी त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनं
इति भूमिं प्रार्थ्य। भूम्यै नमः इति नत्वा। ॐ ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनमस्तता

द्भिः संपूज्य नत्वा वामतदुपविश्य। गुं गुरुभ्यो· गं गणपतये· पं परदेवतायै·। इति दक्षवामस्कंधयो
र्हृदि चक्रमेण नत्वा। फट् इति आसनाधः वामपार्ष्णिघातत्रयेण ॐ नमः सुदर्शनायास्त्राय फट्
इति अस्त्रेणादिग्बंधेन च विघ्नान्दूरीकृत्य स्वपरितो वह्निप्राकारं विभावयेदिति भूशुद्धिः अथ
भूतशुद्धिः। यथा। हं सः इति कुंभकं कुर्वन्मूलाधारस्थां कुंडलिनीं देहस्थाखिलदेवताजीवात्म
सहितां ब्रह्मरंध्रोपरिस्थितशिवेन संयोज्य जडात्मकं स्थूलदेहं वामकुक्षिगतं पापपुरुषमधो
खड्गवर्मधरं पातकोपपातकमयोगं विभाव्य। यं रं वं इति जपन् पूरककुंभकरेचकं कुर्वन् वायुप
ह्निसलिलैः शोषणदाहनाप्लावनानि विधाय तदनु पुनः ॐ हंसोऽहं इति जपन् पूरकादि कुर्वन्

सो० ग्र० द्व०
१०

आप्लावितभस्मनः शरीरात्मतया घनीभावं नत्वा चैतन्यं हृदि जीवात्मनः आनयनं च विमृश्या
त्मनः पंचभूतदेवताद्युत्पत्तिं विभाव्य स्वस्वस्थानस्थितकुंडल्यादिदेवतासहितं शरीरं विभाव
येदिति भूतशुद्धिं कृत्वा। हृदये स्पर्शेन आं सोहं इति त्रिर्जपेत् एवं द्वितीयस्कंधे वश्यमाणमंत्रा
देशाच्च कुर्यादिति प्राणप्रतिष्ठां कृत्वा। अं १५ कं २४ यं ९ पूर्वककुंभेचकैस्त्रिधा प्राणायामं कृत्वा न्या
सान् कुर्यात्। यथा। अस्य श्री मातृकान्यासस्य ब्रह्मा ऋषिः गायत्री छंदः मातृकादेवता इति मस्त
कमुखहृदये पुवि न्यस्य हलो बीजानि स्वराः शक्तयः व्यक्तिः। कलीकं इति गुह्यपादहृदयनाभिषु वि
न्यस्य। अं कं ४ आं अंगुष्ठाभ्यां नमः १ इं चं ४ ईं तर्जनीभ्यां २ उं टं ४ ऊं मध्यमाभ्यां ३ एं जं ४ ऐं

शिवः
१०

10

अनामिकाभ्यां ४ ओं पं ४ औं कनिष्ठिकाभ्यां ५ अं यं १ अः करतलकरपृष्ठाभ्यां ६ अं ह्रं हृद
याय नमः १ ईं ह्रीं शिरसे स्वाहा २ ऊं ह्रूं शिखायै वषट् ३ ऐं ह्रैं कवचाय हुं ४ औं ह्रौं नेत्रत्रयाय वौषट् ५
अं ११ अस्त्राय फट् ६ इति तर्द्दं गुष्ठेन तर्जन्या तर्जन्यादिषु ततर्द्दं गुष्ठेनाकरतलपृष्ठयोः इत
रेतरकरतलाभ्यां करन्यासं विधाय तर्जनीमध्यमानामाभिः १ मध्यमानामाभ्यां २ मुष्टिनि
र्गतांगुष्ठेन ३ व्यत्यस्त हस्तपंचांगुलिभिर्भुजयोः ४ मुष्टिनिर्गततर्जन्यनामामध्यमाभिः नेत्रे
षु ५ मुष्टिनिर्गततर्जनीमध्यमाभ्यां वामकरतलसंताडनेनाद्द स्वपरितः छोटिकया दिग्बंधद
तिन्यासमुद्राः अथ ध्यानं ओं मैं ह्रौं रसनापर्णिकर्णिकमंचाद्दं ह्रैः स्फुरत्केसरं पत्रांतर्गतपंचवर्ग

सो॰ग्य॰द्रु॰ ११

पशान्नाभीदिशित्रिवर्गैकमात्रा। आशास्वस्ति षुलांतलांगलि षुजास्सो पीपुरे धारनं वर्णाज्वं शिर।
सिस्थितं विषगरप्रध्वंसिमत्युंजयं इति ब्रह्मरंध्रे ध्यात्वा। गुरूपदेशानुरोधत आधारध्वनिं श्रु
त्वा कुंभकश्वाससंपर्कप्रबुद्धां कुंडलीं ज्वलज्ज्वलनाकारां तज्ज्वालास्पृष्टविलयविधुबिंबविग
लदमृतबिंदुमयामात्रकावर्णां ध्यात्वान्यसेत्। कंठदेशे विशुद्धिकमलं षोडशदलं विभाव्य
तद्दलेषु अकारादि प्रागदक्षिण्येन। ४ अं नमः इत्यादि ४ अः नमः इत्यंतं स्वरषोडशकं विन्यसेत् ए
वमग्रेऽपि। हृदि द्वादशदलमनाहतसंज्ञं तत्र कादिठांतं द्वादशकं। नाभौ दशदलं मणिपूरसंज्ञं त
त्र डादिफांतं दशकं। उपस्थे षड्दलं स्वाधिष्ठानसंज्ञं तत्र वादिलांतं षट्कं। पायौ चतुर्दलं आ

शिवः ११

धारसंहंतत्रवादिसांतत्रवादिसांतचतुष्कं। स्मरमध्येद्विरष्टमात्रासंहंतत्रहक्षद्वयंचेत्यंतमातृका

न्यासः१ अत्रनारीरांतःस्थाने अशुचिस्थाने च मनसा अन्यत्र रक्षां गुरुमध्यमानामाभिः रक्षवा

हो वामकेरेणान्यत्ररक्षकैरेणमंत्रदेवतास्थानानां रैक्यंभावयन्न्यसेदिति। अथवहिर्मातृ

का। तत्रध्यानं। पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेहां भास्वत्कपर्दाकलितश

शिकलामिंदुकुंदावदातां। अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांबुस्मितेक्षां अच्छा

कल्पामतुच्छस्तनजघनभरांभारतीं तां नमामि। रक्षाधःकोणाद्यामाधः कएंनमा युधानि। मर्ध्नि

४ अंनमः१ मुखवृत्ते· आं२ दक्षनेत्रे· इं·३ वामनेत्रे·४ दक्ष५ वामकर्णयोः ईं दक्ष७ वामघ्राण

योः ८ दक्ष९ वाम गंडयोः १० ऊर्ध्वा ११ धरोष्ठयोः १२ ऊर्ध्वा १३ धरदंतयोः १४ जिह्वायां १५ मूर्ध्नि
१६ दक्ष भुजमूल १ कूर्पर २ मणिबंध ३ अंगुलिमूल ४ नदग्रेषु ५ कवर्गः। एवं वामहस्ते चवर्गः। दक्षो
रुमूल १ जानु २ गुल्फ ३ अंगुलिमूल ४ तदग्रेषु ५ टवर्गः। एवं वामपादे तवर्गः। दक्ष १ वामपार्श्वयो
: २ पृष्ठे ३ नाभौ ४ उदरे ५ पवर्गः। हृदये १ दक्ष २ वामस्कंधयोः ३ गलपृष्ठे ४ हृदयादि दक्षिणकरां
गुल्यंतं ५ एवं वामकरांगुल्यंतं ६ एवं दक्ष ७ वामपादांगुल्यंतयोः ८ एवं नाभ्यंतं ९ मूर्धांतं च
१० पादिक्षांतान्न्यसेदिति वह्निर्मातृकान्यासः २ अथांतश्चक्रन्यासः अधः सहस्रारे ४ अं आं

सौः चतुरस्रत्रयात्मके त्रैलोक्यमोहनचक्राधिष्ठात्र्यै अणिमाद्यष्टाविंशतिशक्तिमत्सहितत्र

12

7

कूटयोगिनीरूपायै त्रिपुरादेव्यै नमः १ ततुपरि विशुद्धे षड्दले ४ ऐं २ षोडशदलपद्मात्मकसर्वा
शापरिपूरकच• ऐं कामाकर्षिण्यादिषोडशान्ता• नगुप्तयोगि• यै त्रिपुरेश्वरीदे २ आधारे ४ ह्रीं क्लीं सौः
अष्टदलपद्मात्मकल सर्वक्षोभणच• ऐं अनंगकुसुमाद्यष्टश• नगुप्ततरयो• यै त्रिपुरसुंदरीदे• ३
स्वाधिष्ठाने ४ हैं ह्क्लीं ह्सौः चतुर्दशारात्मकसर्वसौभाग्यदायकच• ऐं सर्वसंक्षोभिण्यादिचतुर्दशश•
नसंप्रदाययो• यै त्रिपुरवासिनीदे• ४ मणिपूरे ४ हैं ह्क्लीं ह्सौः दशारात्मकसर्वार्थसाधकच• ऐं स
र्वसिद्धिप्रदादिदशश• नकुलोत्तीर्णयो• यै त्रिपुराश्रीदे• ५ अनाहते ४ ह्रीं क्लीं ब्लें दशारात्मकसर्व
रक्षाकाराचक्रा• ऐं सर्वज्ञादिदशश• ननिगर्भयोः यै त्रिपुरमालिनीदेवी• ६ विशुद्धौ ४ ह्रीं श्रीं सौः अ

शारात्मकसर्वरोगहरचक्रेः ऐंवशिन्याद्यष्टश.-तरहस्ययो.-येत्रिपुरासिद्धादे.७ लंविकाग्रे.४ ह्सैं ह्स्क्ल्रीं
ह्सौंत्रिकोणात्मकसर्वसिद्धिप्रदच.ऐंकामेश्वर्यादित्रि.ना.तातिरहस्ययो.येत्रिपुरांबादे.८ आज्ञायां
४ मू.बिंद्वात्मकसर्वानंदमयच.ऐंषडंगायुधदशशक्तिःतपरापररहस्ययोगिन्यै.यैमहात्रिपुरसुं
दरीदेव्यैनमः ९ पुनःआज्ञाचक्रोपरि एवैकांगुल्फदेशे बिंदौ १ अर्धचंद्रे २ रोधिन्यां ३ नादे ४ नादांते
५ शक्तौ ६ व्यापिकायां ७ समनायां ८ उन्मनायां ९ क्रमेण अं आं सौः नमः इत्यादि चक्रेश्वरीमंत्रा
न्यसेत्। ब्रह्मरंध्रे महाबिंदौ। मू.श्रीं नमः इति विन्यसेत्। इत्यंतश्चक्रन्यासः ३ अथ बहिश्चक्रन्यासः।
आदावुक्तानां पादयोः १ जान्वोः २ ऊरुमूलयोः ३ नाभौ ४ हृदि ५ कंठे ६ मुखे ७ नेत्रयोः ८ मूर्ध्नि ९

चक्रमेण न्यसेदिति वहिश्चक्रन्यासः ४ शिरसि अं १५ व्लूं वशिनी वाग्देवतायै· १ ललाटे कं ४ क्लह्रीं

कामेश्वरी वा· २ भ्रूमध्ये चं ४ न्व्लीं मोदिनी वा· ३ कंठे टं ४ विमला वा· ४ हृदि तं ४ ज्म्रीं अरुणा वा· ५ ना

भौ· पं ४ ह्स्ल्व्यूं जयिनी वा· ६ मूलाधारे यं ३ झ्म्र्यूं सर्वेश्वरी वा· ७ पादादिमूर्धांतं· शं ५ क्ष्म्रीं कौलिनी

वा ८ इति वाग्देवतान्यासः ५ मस्तके कं १ ललाटे एं २ दक्षनेत्रे ईं ३ वामे लं ४ मुखे ह्रीं ५ कंठे हं ६ हृदि

से ७ दक्षपार्श्वे कं ८ वामे हं ९ नाभौ लं १० लिंगे ह्रीं ११ मूले सं १२ दक्षोरौ कं १३ वामे लं १४ पाद

योः ह्रीं १५ पुनः पादादिमस्तकांतं न्यसेत् इति मूलविद्यान्यासः ६ अथ तत्त्व· दक्षपादे आत्म

तत्त्वाय· १ वामे क्रियाशक्त्यै न· २ दक्षपार्श्वे विद्यातत्त्वाय नः ३ वामे ज्ञानशक्त्यै· ४ दक्षकपोले शि

वनत्वाय॰ ५ वामे ई ख्राश॰ ६ मूर्ध्नि सर्वतत्वाय ७ नचैव तुर्यशक्तैः ८ इति तत्वन्यासः ७ मूला
धारे ऐं क ४ अग्निचक्रे कामगिरिपीठे मित्रीशनाथात्मके जाग्रद्दशाधिष्ठायके इच्छाशक्त्या
त्मक रुद्रात्मशक्तिः श्रीमहाकामेश्वर्यैन॰ १ अनाहते क्लीं ह ५ सूर्यचक्रे जालंधरपीठे षष्ठीश
नाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मक विष्ण्वात्मशक्ति श्रीमहावज्रेश्वर्यैन॰ २ आ
ज्ञायां सौः स ३ सोमचक्रे पूर्णगिरिपीठे ओडीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रिया
शक्त्यात्मक ब्रह्मात्मशक्ति श्रीमहाभगमहाभगमालिन्यै॰ ३ ब्रह्मरंध्रे ऐं २ म॰ परब्रह्मचक्रे
महोड्याणपीठे चर्यनाथात्मके तुरीयदशाधिष्ठायके शांतानंत्यात्मक परब्रह्मात्मशक्ति श्री

महात्रिपुरसुंदर्यै नमः ४ इति कामेश्वर्यादिन्यासः ८ अं अंगुष्ठयोः अं नमः १ तर्जन्योः आं २ म
ध्यमयोः सौ ।३ अनामयोः अं ४ कनिष्ठयोः आं ५ करतलपृष्ठयोः सौः ६ इति करशुद्धिन्यासः
ततः षडंगन्यासः इति रत्नाद्यान्यासः इत्येवं विन्यस्तदेहः सपर्यामारभेत् अत्रागमोक्तोद्विविध
मातृकावशिन्याद्दिमूलविद्याकरशुद्धिषडंगमिति न्यासषट्कं कुर्यात् आपदि तु मातृकमूल
विद्याषडंगन्यासेन चारितार्थ्यं मृताशौचे तु मातृकादिकमपि तु मानसिकं कार्यं पूर्वा
भिषिक्तः समर्थस्तु पंचांगादिन्यासाष्टकमपि न्यसेत् तान्न्यासस्के चेल्लिख्यते इति शि
वं श्रीमाधवानंदनाथकृते सौभाग्यपूर्वके कल्पद्रुमे ह्यमृतस्कंध आद्यं संध्यादि सकल

सौ॰ग्य॰द्रु॰
१५

15

॥इति श्रीसौभाग्यकल्पद्रुमे प्रथमस्कंधः १ नित्यपूजाविधानेन पूजिता याप्रयच्छति॥ वांछि
तार्थान्पूजकेभ्यस्तामेवां प्रणमाम्यहं। अथैवं कृतसंध्यादिक्रियः सपर्यामारभेत्। सा च त्रि
धा नित्यनैमित्तिककाम्यभेदात्। तत्र नित्यां निर्वर्त्य नैमित्तिकादि सपर्यां कुर्यात्। अत आदौ
नित्यसपर्याविधिरालिख्यते। शुचिः प्रक्षालितपाणिपादो वस्त्राभरणाद्यलंकृतनिजक
लेवरः। पंचतिक्तवासितमुखः। सपर्यामंदिरपूर्वद्वारादि। चतुर्द्वारेषु अथवा परिकल्पि
तद्वारे सपर्यास्थानात्पश्चिमदिशि विभावितद्वारे वा द्वारपूजां कुर्यात्॥ यथा॥ आचम्य
देहलीपुरतः॥ गंधोदकेन वर्तनचतुरस्रमंडलं मत्स्यमुद्रया विधाय ४ अखंडमंडला

त्रि॰ वः
१५

कारं विश्वं व्याप्यव्यवस्थितं। त्रैलोक्यं मंडितं येन मंडलं तन्नः सदाशिवं॥ इति गंधपुष्पाक्षतैर्मं
डलं। संपूज्य। फडिति स्रालिन साधारतामत्रपात्रं तदुपरि स्थाप्य। तत्पात्रे। ह्रां हृदयाय नमः
इति तोयमापूर्य। ब्रह्मांडादरैरिति वक्ष्यमाणमंत्रेण वक्ष्यमाणविधिना तोयेन तीर्थमावाह्य ४ इति
तीर्थं गंधादिना संपूज्य॥ ३ इति त्रिरभिमंत्र्य। वं धेनुं प्रदर्श्यामृतीकृत्य तार्क्ष्येण निर्विषीकृ
त्य। स्त्रेण रक्ष्य कवचेनावगुंठ्य अनामांगुष्ठयोगात्मक तर्पणमुद्रया धृतकुसुमोद्धृततोयेन ह्वा
रं फट् इति द्वादशधा प्रोक्ष्य। अथ तर्जन्यंगुष्ठयोगात्मक पूजनमुद्रासादितासनपुष्पैरेव
पादं सहस्तेनाहृतेरेण पूर्ववत्तर्पणं पुनः पञ्चकुर्यादिति। यथा। ह्रां रो र्ध्यै॥ ४ ओं अविघ्नाय नम

:।।१।।४ मं महालक्ष्म्यै।।२।४ सं सरस्वत्यै॰।।३।। दक्षभागे।।४ गं गणपतये॰।।४।।वामे४ क्षं क्षेत्रपा
लाय॰।।५ दक्षे।।४ गं गंगायै॰ ६।।वामे।४ यं यमुनायै॰।।७।।दक्षे।४ धां धात्रै ८।वामे ४।विं विधात्रै
॰।९।दक्षे॰४।शं शंखनिधये॰।।१०।वामे ४ पं पद्मनिधये॰ ११ देहल्यां॰।।४।हूं: अस्त्राय फट् अ
स्त्रदेवाय नमः।।१२।४ आं ब्राह्म्यै॰ १।४ ईं माहेश्वर्यै॰ २।४ उं कौमार्यै॰ ३। ऋं वैष्णव्यै॰ ४।४ ऌं वारा
ह्यै॰ ५ एं माहेंद्र्यै॰ ६।४ औं चामुंडायै॰ ७।४ अः महालक्ष्म्यै॰।८। इति। अत्र द्वारचतुष्टयपूजा
पक्षे अस्त्रदेवतांतं।।प्रतिद्वारे पूजनीयं।।ब्राह्म्यादि युद्धयं द्वयं प्राग्द्वारादि प्रादक्षिण्येन
।इति द्वारपूजां विधाय।।अपसर्पंत्विति पठन्। अंतश्वासानुसारेण वामांगसंकोचतः प्र

16

विघ्यासनेउपविशेत्। अथ तत्र भूशुध्यादिन्यासांतं कुर्यात्। कृते भूशुध्यादिके तु संकल्प
मेव कुर्यात्। प्रदेशांतरे कृते तु भूशुद्धिमात्रं कुर्यात्। ततः। अं शो गादि स्थितिं चोद्दिश्य कामे
श्वरीप्रीत्यर्थं यथासंभवैर्द्रव्यैर्यथाशक्त्यात्तं त्रोक्तविधानेन पूजनमहं करिष्ये। ततो नैमि
त्तिकपूजास्वं ध्येवक्ष्यमाणश्रीयंत्राद्यन्यतमे॥ पूजापीठं स्वपुरतः हस्तमितां भूमिं मध्ये विहा
य यथासंभवे पीठाद्यो स्थलं कृते स्थापयेत्। अत्र दिगव्यवस्था पूज्यपृष्ठभागस्य पूर्वत्वेन
ध्येयानेन पूज्यपुरोभागस्य पश्चिमत्वमिति। पीठदक्षभागे दीपं स्वदक्षिणपार्श्वकोणे नातिदू
रतः प्रक्षालनपात्रं स्वदक्षे समीपतः पुष्पाद्युपकरणं च स्थापयेत्। ततः महागणपतिं न्यास

सौ· य· दु·
१७

पूर्ववत्किंचिज्जपित्वा समर्प्य। विघ्नेश्वर नमस्तेस्तु भक्ताभीष्टफलप्रद। मया संप्रार्थितो वि-
घ्नान् पूजायां विनिवारय। इति प्रार्थ्य नि रस्तं तिं गणेशाय जपित्वा द्वारे देशे ध्यात्वा पुष्पाक्ष-
तैरभ्यर्च्य। यथाशक्ति मूलविद्यां च प्रजप्य। ताम्रपात्रे गंधाक्षतपुष्पतोयं गृहीत्वा। ५ ह्रां
ह्रीं हंसः प्रकाशशक्तिसहितमार्तंडभैरवाय एष अर्घ्यः स्वाहेति दत्वा॥ ततः दक्षभागे पीठाग्रे स-
मीपतः सामान्यकलशं १ तस्योत्तरोत्तरतः २ बलिपात्रं ३ गुरुपात्रं श्री ४ पात्रं ५ शं ख ६ हेतु
पात्रं द्वितीय ७ तृतीय ८ शुद्धिपात्राणि च। स्वपुरत १० आत्मपात्रं चेति दशपात्रं चेति दश
पात्राणि स्थापयित्वा ततः सामान्यकलशाधः स्वतश्चतुरस्रमंडलं मत्स्यमुद्रया कृत्वा। शंख

शि· व·
१७

17

मुद्रयाद्द्स्त्रां गुष्ठेन मंडलं स्पृष्ट्वा वर्तते ॥४ सामान्य कलशमंडलाय नमः इति संपूज्य चतुरस्त्रा

ग्नीशासुर वायुकोणेषु मध्ये चतुर्दिक्षु च षडंगं पुष्पाक्षतैः संपूजयेत् ॥४ ऐं हृदयाय नमः ॥१

४ क्लीं शिरसे स्वाहा २ ॥४ सौः शिखायै वषट् ३ ॥४ ऐं कवचाय हुं ४ ॥४ क्लीं नेत्रत्रयाय वौषट् ५

सौः अस्त्राय फट् ॥६ इति तत्र सुगंधितोयपूरिते पात्रं साधारं स्थाप्य ॥४ ऊँ ब्रं स्त्रां ओद्दरतीर्था

नि करैः स्पृष्टानि ते रवे तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ क्रों इत्यंकुशमुद्रया सूर्यमंडला

त्तीर्थान्याकृष्य ॥ गंगे च यमुने कुर्यादिति कलशे आवाह्य ॥ ऊँ नमो भगवति अशेषतीर्थालवाले

शिवजटाधिरूढे गंगे गंगांबिके स्वाहा ॥ इत्यभिमंत्र्य ॥ धेनुमुद्रयावमित्यमृतीकृत्य ताक्ष्य

सौ० ग० दु०
१८

18

मुद्रया निर्विषीकृत्य। ॐ नमः सुदर्शनायास्त्राय फट् इत्यस्त्रमुद्रया संरक्ष्य। हुमिति कवचेना
वगुंठनमुद्रयावगुंठ्य। गंधपुष्पाक्षतैः संपूज्य मूलाष्टकेनाभिमंत्रयेदिति कलशपूजाविधि
ः। अथ हेतुपात्राधः पूर्ववन्मंडलं पूजां तं कृत्वा तदुपरि। ४ ऐं अग्निमंडलाय धर्मप्रदद्दशा
कलात्मने हेतुपात्राधाराय नमः। इत्याधारं दंग संस्थापितं संपूज्य तस्मिन्नागादिवत
क्रमेणाग्निकलां पूजयेत्तद्यथा। ४ यं धूम्रार्चिकलायै नमः १। ४ रं उष्माकलायै २। ४ लं
ज्वलिनीकः ३। ४ वं ज्वालिनीकः ४। ४ शं विस्फुलिंगिनीकः ५। ४ षं सुश्रीकः ६। ४ सं सुरूपा
कः ७। ४ हं कपिलाकः ८। ४ ळं हव्यवहाकः ९। ४ क्षं कव्यवहाकः १०। इति संपूज्या अग्निक

शिवः
१८

लात्मकमाधारं विभाव्य। आधारोपरि सुवासिनं हेतुकलशं ४ क्लीं सूर्यमंडलायार्थप्रद द्वाद
शकलात्मने हेतुपात्राय नमः इति संस्थापितं संपूज्य। तस्मिन्नग्न्यादि पूर्वक्रमेण सूर्यकलाः
पूजयेत्। यथा। ४ कं भं तपिनीकलायै नमः १।४ खं बं तापिनीक० २।४ गं फं धूम्राक० ३।४ घं पं मरि
चीक० ४।४ ङं नं ज्वालिनीक० ५।४ चं धं रुचिक० ६।४ छं दं सुषुम्णाक० ७।४ जं थं भोगदाक० ८।४
झं तं विश्वाक० ९।४ ञं णं बोधिनी० १० टं ढं धारिणीक० ११।४ ठं डं क्षमाकलायै नमः १२।४ श्री
हेतुपात्राय नमः इति गंधपुष्पाक्षतैरभ्यर्च्य। पूर्ववद्विभाव्य मनुमेनं। अथ सुवासिनन्ती
र्थकलशं सहस्रां योगिनीं परदेवतां बुध्यारक्तां रक्तांबरां रत्नभूषाभिः समलंकृतां। सुधापात्र

धरांदेवीं मदघूर्णितलोचनांइति ध्यात्वा॥ संपूज्य। कलशंच गंधादिभिरभ्यर्च्य। कलशंस्थ
शंखं। ४ॐ नमो भगवते वासुदेवाय हुं फट् नमः। इतिसप्तधाभिमंत्र्या ततः स्वपुरतः आधारो
परिनिधाय। कुसुमोद्धृततीर्थस्थे शेः। पथिक देवतां द्वारदेशाभिमुखं तत्र पर्यन्ता। यथा। ४ ह्लें
पथिकदेवताभ्यो हुं फट् स्वाहा। १। ४ वं ग्रामचंडालिनी हुं। २। २४ वं तपस्विनी चंडालिनी हुं। ३। ३। ४
वंनिंद्राचंडालिनी हुं। ३। ४। ४ वं सर्वपशुजनदृष्टिदोषाय हुं फट् स्वाहा। ५ इति। कलशं गंधादि

भिः संपूज्य। तं स्वशंखरूपेण। स्वादिष्टया मदिष्ठया पवस्व सोमधारया। इंद्राय पातवे सुतः
१ रक्षोहा विश्वचर्षणिरभियोनिमयोहतं। द्रुणा सधस्थमासदत् २ वरिवोधातमो भवंमं

निः। वः

हिष्ठोवृत्रहंतमः।परिषिराधोमघोनां ३ अभ्यर्षमहानांदेवानांवीतिमंधसा।अभिवाजमुतश्र
वः ४ त्वामछाचरामसितदिदर्थंदिवेदिवे इंदोत्वेन आशसः ५ विष्णुर्योनिंकल्पयतुत्वष्टारू
पाणिपिंशतु।आसिंचतुप्रजापतिर्धातागर्भंदधातुते।गर्भंधेहिसिनीवालिगर्भंधेहिस
रस्वति।गर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजा १ हिरण्ययीअरणीयन्निर्मथतोअश्विना।
तंतेगर्भंहवामहेदशमेमासिसूतवे १ त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः।अग्नेदक्षैः
पुनीहिनः १ पुनंतुमांदेवजनाःपुनंतुवसवोधिया।विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा
।२ प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः।देवेभ्यउत्तमंहविः।१ इमंमेगंगेयमुनेसर

स्वनिश्चुतुद्रि स्तोमं सचता परुष्ण्या असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमः या १
सितासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति। ये वै तन्वं विसृजंति धीरास्ते जना
सो अमृतत्वं भजंते। १ तामंदसाना मनुषो दुरोण आधत्तं रयिं तुतंतीर्यं सुप्र पाणं शुभस्पती स्था
णुं पथेष्ठामपदुर्मतिं हतं १ श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतं। आनि
म्रुचः शकृदेको अपाभरत् किं स्विन्पुत्रेभ्यः पितरा उपावतुः १ हिरण्यपात्रं मधोः पूर्णं दधा
ति। पथ्योसानीति। १ एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति २। घृ।
णिः सूर्य आदित्यो प्रभा वात्यक्षरं। मधु क्षरंति तद्रसं। सत्यं वै तद्रसमापो ज्योती रसो मृतं ब्रह्म

20

भूर्भुवः स्वरों। ४ एकमेव परंब्रह्म स्थूलसूक्ष्ममयं ध्रुवं। कचोद्भवां ब्रह्महत्यां तेनेन ते नाशयाम्य
हं। सूर्यमंडलसंभूते वरुणालयसंभवे। उमावीजमये देवी शुक्रशापाद्विमुच्यतां। वेदानां प्रणवो
वीजं ब्रह्मानंदमयं यदि। तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु। ४ ॐ नमो भगवति वारुणी जड
मूर्त्तये ग्रामेश्वरी पथिकदेवते गृह्ल गृह्ल सर्वदोषान्मोचय मोचय श्रीं ह्रीं क्लीं ऐं श्रां श्रीं श्रूं श्रैं श्रौं।
श्रः शुक्रशापविमोचिकायै स्वाहा। इति तन्तत्तीर्थले शाद्दी कृतकरावाघ्राय। ततो र्योदकं नासि
कामार्गेणांतः प्रविश्य ब्रह्मरंध्रस्थचिच्चंद्रमंडलामृतसामरस्येनामृतमयं तत्र ब्रह्मरंध्रान्ने
त्रमार्गेण निर्गत्य करस्थितं विमृश्य। ऐं ह्रीं श्रीं ३ ॐ नमो भगवति तिरस्करिणि के त्रैलोक्यमो

सो·ग·दु·
२१

हि निमहामाये पशुजनम[illegible]श्चक्षुश्रोत्रतिरस्करणं कुरु कुरु स्वाहा सो: ५ इति पुनरभिमंत्र्या सा
मान्यकलशाद्दक्षभागे स्थापयेत्॥ ततः द्वितीयपात्राधो मंडलाद्यं गधपूजां तं कृत्वा॥ तत्राधारपात्र
योः अग्निसूर्यकलाः पूर्ववत्॥ २९ पूजयेत्॥ द्रव्यान्विशेषः हेतुपात्र पदस्थाने द्वितीयपात्रे तत्र हृ:।
एवमेवाग्नेतत्स्थानेतत्पात्रपदप्रयोगो ज्ञेयः। ततः। सो: सोममंडलाय कामप्रदषोडशात्म
कलात्मने शु· स्वंड्राय नमः। इति। तस्मिंश्चलत्पुष्पं स्वंडान्वि। सितान्संपूज्यानीर्थेनाभ्युक्ष्य·। ४ प
शुपाशाय विद्महे विश्वकर्मशिरश्छेदाय धीमहि। तन्नश्छागः प्रचोदयात्॥ शिवोत्कृतमिदं पिंडमतस्त्वं
शिवतां व्रज उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवो ह्यसि। इति त्रिरभिमंत्र्य। सद्योजातं प्रपद्या

21

शि·व:
२१

मि सद्योजाताय वै नमो नमः। भवे नाति भवे भवस्व मां भवोद्भवाय नमः। वामदेवाय नमो ज्येष्ठा
य नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्र
मथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः अघोरेभ्योथ घोरेभ्यो घोर घोरतरेभ्य
ः सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो
रुद्रः प्रचोदयात्। ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्र
ह्मा शिवो मे अस्तु सदाशिवोम्। इति वामिमंत्राः। पुष्पखंडे पुष्पागादि सोमकलाः पूजयेत्। य
था। ४ अं अमृतकलायै नमः १।४ आं मानदाकः २।४ इं पूषाकः ३।४ ईं तुष्टिकः ४।४ उं पुष्टि

सौ॰ग्य॰हृ॰
२२

22

कः ५।४ उं रतिकः ६।४ ऊं धृतिकः ७।४ ऋं शशिनीकः ८।४ ॠं चंद्रिका ९।४ लृं कांतिकः १०।४
एं ज्योत्स्नाकः ११।४ ऐं श्रीकः १२।४ ओं प्रीतिकः १३।४ औं अंगदाकः १४।४ अं पूर्णाकः १५।४
अः पूर्णामृताकः १६। एवमेवान्तरीयपात्रविधिः। अयं विशेषः। पशुपाशायेत्यादिमंत्रस्थाने
त्रियंवकमितिमंत्रः ४ त्रियंवकं यजामहे सुधिपुष्टिवर्धनं। उर्वारुकमिव वंधनान्मृत्योर्मुक्षी
यमामृतात्। मुद्रापात्रस्थाने मंडलाद्यंगपूजनं कृत्वा। तत्र मुद्रां पात्रे निधाय तीर्थेनाभ्युक्ष्य
४ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः। दिवीव चक्षुराततं। तद्विप्रासो विपन्यवो जागृ
वांसः समिंधते विष्णोर्यत्परमं पदं। इति मंत्रं जपेदिति। ततः क्लूंमिति द्वितीयादिलेशांहेतु

त्रिम्बः
२२

पात्रे निक्षिप्य। ग्वं सोऽखंडसंभृतमशेषरससंभृतां। आपूरितं महापात्रं पीयूषरसमावह
इति हेतुपात्रे तीर्थमापूर्य। ४ सौः सोममंडलाय ०। मने हेतुपात्रामृताय नमः इति तीर्थं संपू
ज्य तस्मिं सोमकलाः संपूज्य। हेतुपात्रतीर्थे आग्नादिनिऋतिपर्यंतं अकारादिविसर्गांता
न्। तदादिवायुपर्यंतं कादितांतान्। नदादिप्रागंतं थादिसांतान्॥ कोणेषु हळक्षान्। दक्ष
वामपार्श्वयोः ईं क्षौं। तत्त्रिकोणमध्ये हंसः॥ इति वर्णत्रिकोणं॥ तद्बहिः क्रमेण चतुरस्रवृत्त
त्रिकोणाषट्कोणाष्टदलानि च विभाव्य। वर्णत्रिकोणमध्ये पूजयेत्। ४ ग्लूं गग
नरत्नाय नमः। ४ स्लूं स्वर्गरत्नाय नमः। ४ म्लूं मर्त्यरत्नाय नमः। ४ प्लूं पातालरत्नाय नमः। ४ न्लूं

नमो नारत्नायन मः१।४ अथ हे तु तीर्थं दव्यमादाय दक्षहस्त पूजा मुद्रा गृहीत पुष्पाक्षतैः इत
रह मुद्राधृत पुष्प स्वं ज्ञोत्थ्य तद्वीतीर्थ विंदुं भि र्युगपत् चतुरश्र दक्ष वामयोः क्रमेण तर्प
येत्।४ ह्स्ख्फ्रें आनंद भैरवाय वषट्। आनंद भैरव श्री पादुकां पूजयामि तर्पयामि नमः।१।४। स
ह्स्क्ष्म्ल्व्र्यीं सुधादेव्यै वौषट् आनंद भैरवी श्री पा०।। द्वीग न शोषतीर्थं पात्रांतरे संस्थाप्य।। पात्रस्यानो
त्तरे हेतु पात्रे निक्षिप्य त्। अथ त्रिकोणे अग्यादि वामावर्त्तेन।। कोणत्रये मध्ये च पूजयेत् ४ ऐं क ४ अ

ग्निचक्रे कामगिरि पीठे मित्रीश नाथात्मके जाग्रद् शाधिष्ठायके रुद्रात्मशक्ति कर्त्र्यात्मक रुद्रात्मशक्ति
श्री महाकामेश्वरी श्री पादुकां पूजयामि नमः।१।४ क्लीं ह ५ सूर्यचक्रे जालंधर पीठे षष्ठीश

नाथात्मके स्वरीश्वरीमपादुकां पूजयामि नमः ।१।४ जाग्रद्दशाधिष्ठायके ज्ञानेशक्त्यात्मकविष्णु
त्मशक्ति श्रीमहावज्रेश्वरीश्री ।२।४ सो: स ३ सोमचक्रे गिरिपीठे ओड्डीशनाथात्मके सुषुप्ति
दशाधिष्ठायके क्रियाशक्त्यात्मक ब्रह्मात्मशक्ति श्री महाभगमालिनीश्री ।३।४ ३ मू: परब्रह्म
चक्रे महोड्याणपीठे चर्यानाथात्मके तुरीयदशाधिष्ठायके शांताशक्त्यात्मक परब्रह्मात्मश
क्तिश्री महात्रिपुरसुंदरीश्री ।४। अथ षट्कोणे प्रागादि ।४ ऐं हृदयाय नमः हृदये देवीश्री ।१ इत्या
दि अस्त्रदेवीइत्यंतं षडंगपूजां कृत्वा अष्टदले प्रागादि ।४ अं आं ब्राह्मीसहीतासितांगभैर
वश्री ।१।४ इं ईं माहेश्वरीसहितरुरुभैरवश्री ।२।४ उं ऊं कौमारीसहिताचंडभैरवश्री ।३।४ ऋं ॠं

सो. ग. द्रु.
२४

वैष्णवीसहितक्रोधभैर. ४।४ लृं लॄं वाराहीसहितउन्मत्तभैर. ५।४ एं ऐं माहेन्द्रीसहितकपालिभै. ६।४ ओं औं चामुण्डासहितभीषणभैर. ७।४ अं अः महालक्ष्मीसहितसंहारभैरवश्रीः ८।

